**अभिनन्द्य** त्रि० अभिनन्द्यते प्रशस्यते अभि+नन्द–णिच्–यत् । १ प्रशंसनीये "जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ" रघुः अभि+नन्द–णिच् ल्यप् । प्रशस्येत्यर्थे अनुमोदनेन प्रोत्साह्येत्यर्थे अव्य० ।

**अभिनम्र** त्रि० अभिमुखं नम्रः प्रा० स० । आभिमुख्येन नम्रे नते "इमां तटाघातलताञ्च तन्वीं स्तनाभिरामस्तवकाभिनम्राम्" रघुः ।

**अभिनय** पु० अभि–नी–करणे अच् । १हृद्गतभावव्यञ्जके शरीरचेष्टादौ । भावे अच् । २अभिनेयपदार्थस्य शरीरचेष्टाभाषणादिभिरनुकरणे "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिकोवाचिकश्चैवमाहार्यः सात्त्विकस्तथेति" नटै रङ्गादिभिः रामयुधिष्ठिरादीनामवस्थानुकरोऽभिनयः सा० द० । नर्त्तकीरभिनयातिलङ्घिनीति" रघुः । नानाभिनयसम्बन्धान् भावयन्ति रसान् यतः" सा० द० तदभिनयमिवावलिर्वनानामतनुत नूतनपल्लवाङ्गुलीभिः माघः । "अङ्गैरालम्बयेद्गीतं हस्तेनार्थं प्रकाशयेदित्युक्तदिशा व्यञ्जकचेष्टामतनुतेत्यर्थः । "शौरिरित्यभिनयादिवोच्चकैः" माघः । अभिनयति बोधयत्यर्थमत्र आधारे अच् । शरीरचेष्टादिभिर्द्दृश्यपदार्थज्ञापके २ रूपकादौ दृश्यकाव्ये ।

**अभिनव** पु० अभि+नु–भावे अप् । आनुकूल्यार्थस्तवे । अभिमतः प्रशस्तः नवः प्रा० स० । प्रथमोद्भूते नवीने त्रि० । "रथाङ्गभर्त्रेऽभिनवं वराय" माघः । "अभिनवा इव पत्रविशेषकाः" रघुः ।

**अभिनवतामरस** न० "अभिनवतामरसं ननजाद्य" इति वृत्त० उक्ते द्वादशाक्षरपादके १वृत्तभेदे । २नूतनपद्मे च ।

**अभिनवोद्भिद्** (द) पु० अभिनवमुद्भिद्य जायते उद्+भिद्–क्विप् क वा । अङ्कुरे । [दृढबन्धने च ।

**अभिनहन** न० अभि+नह्–भावे ल्युट् । १अभितो बन्धने

**अभिनिधन** त्रि० अभिगतं निधनम् अत्या० स० । १नाशाभिमुखतां प्राप्ते नाशोन्मुखे । निधनस्य समाप्तेर्वाभिमुख्यम् अव्ययी० । २नाशावसनयोराभिमुख्ये अव्य० तत्र पाठ्ये ३सामभेदे च । "आभीकमभिनिधनमाभीक्ष्णवानि" कात्या० २५, १४, १५, "आभीकाद्यानि सामानीति" कर्क० ।

**अभिनिधान** अभि+धा–भावे ल्युट् । १आभिमुख्येन स्थापने । "संसृश्य पुरूरवा इत्यभिनिधानतया" कात्या० ५, १, २१ ।

**अभिनिर्मुक्त** पु० अभितः सर्व्वतः सायन्तनकर्म्मणा निर्मुक्तः । १सूर्य्यास्तकाले निद्रावशात् त्यक्ततत्कालकर्त्तव्यकर्म्मणि । "सूर्य्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः प्रायश्चित्तमकुर्वाणोयुक्तः स्यान्महतैनसा" मनुः एतद्वचनस्य ब्रह्मचारिप्रकरणत्वात् ब्रह्मचारिण्येवम्भूतेऽस्य रूढिः ।

**अभिनिर्य्याण** न० अभिलक्ष्य रिपून् निर्य्याणम् युद्धार्थं निष्क्रमः । रिपुजिगीषया सैन्यैः सह निष्क्रमणे ।

**अभिनिर्वृत्त** त्रि० अभि+निर्+वृत–क्त । १ निष्पन्ने ।

**अभिनिर्वृत्ति** स्त्री० अभि+निर्+वृत–क्तिन् । १ निष्पत्तौ ।

**अभिनिवर्त्त** पु० अभि+नि+वृत–भावे घञ् । १ अभितो-निवृत्तौ । णमुल् । अभिनिवर्त्तम् । पुनः पुनर्निवृत्येत्यर्थे अव्य० । "पुनरभिनिवर्त्तमृत्विजोभक्षयन्ति तस्मादृतवस्य मासस्यान्योन्यमभिनिवर्त्तन्ते" शत० ब्रा० ।

**अभिनिविष्ट** त्रि० अभि+नि+विश–कर्त्तरि क्त । १ अभिनिवेशयुक्ते २चिन्तयाव्यग्रे ३चिन्तनाय प्रवृत्ते च "निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता" सा० द० ।

**अभिनिवेश** पु० अभितोनिवेशः घञ् । अवश्यमिदं कर्त्तव्यमित्याग्रहसमन्विते मनःसंयोगभेदे योगशास्त्रप्रसिद्धे मरणभीतिजनके अज्ञानविशेषे, अनित्यैरपि देहादिभिर्वियोगो मा भूदिति मरणनिवारणार्थं आग्रहे च । योगशास्त्रे हि अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः दर्शिताः क्लिश्यन्ति कर्मतत्फलप्रवर्त्तकाः सन्तः पुरुषं दुःखाकुर्व्वन्ति क्लेशाः पञ्च । उत्तरेषामविद्याप्रसवत्वमपि तत्रोक्तम् । "अविद्याक्षेत्रत्वमुत्तरेषामप्रसुप्ता तनुविच्छिन्नोदाराणाम्" पा० सू० उत्तरेषामस्मितादीनामविद्याक्षेत्रं प्रसवभूमिः तेषाञ्च अप्रसुप्ता विवेकख्यात्यभावेनादग्धतया शक्तिरूपेणावस्थानात् अतएव ते पुनरुद्भवन्ति ते च क्रियायोगिनां तनवः, विषयसङ्गिनां विच्छिन्ना उदाराश्च भवन्ति । यथा यत्र रागस्तत्र क्रोधो विच्छिन्नः सुरतां राग उदारः । एवं यत्र क्रोध उदारस्तत्र रागोविच्छिन्न एवं रागादयः विच्छिन्नोदाराभूत्वा पुरुषपशुं क्लेशयन्ति एवं च क्लेशा अविद्यामूलाः अविद्यायाः पुरुषविवेकख्यात्या-निवृत्तौ निवर्त्तन्ते । एवं सामान्यतः क्लेशानुक्त्वाऽभिनिवेश उक्तः "स्वरसवाही विदुषोरूढोऽभिनिवेशः" इति । विदुषोमूर्खस्य वा जन्तुमात्रस्य यो मरणत्रासः सोऽभिनिवेशः यथा मूर्खस्य अहं सदा भूयासं न म्रियेयेति रूढः त्रासस्तथा विदुषोऽपि दृश्यते यतः स्वरसवाही सः, पूर्व्वजन्मसु असकृन्मरण दुःखानुभवजन्यवासनासंघः स्वरसः तेन वहति प्रवहतीति स्वरसवाही । ते चाविद्यादयः पञ्च क्रमेण तमोमोहमहामहतामिस्रान्धतामिस्रसंज्ञाः । सांख्यकारिकायाम् पञ्च विपर्य्ययभेदानुपक्रम्य । "भेदस्तमसोऽष्टविधो-